# संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119)

## आदर्श-प्रश्नपत्रम्

## कक्षा - दशमी (2026-27)

**अवधिः - होरात्रयम्** **अङ्कयोजना उत्तरसङ्केताश्च** **पूर्णाङ्काः - 80**

| | | |
|---|---|---|
| **अवधातव्यम् -**<br>1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।<br>2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्त्तव्यः।** यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्। **(अयं नियमः नवम्यां कक्षायाम् अपि पालनीयः।)**<br>3. गद्यांशे श्लोके नाट्यांशे वा पृष्टाः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु पूर्णाङ्काः।<br>4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।<br>5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।<br>6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः। | | |
| | **'क' भागः**<br>**अपठितावबोधनम्** **(10 अङ्काः)** | |
| 1. | **गद्यांशः**<br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) लाभालाभयोः<br>(ii) साहसिनः<br>(iii) श्रीः<br>**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) अधुना आवश्यकता अस्ति यद् देशस्य भाविनः नागरिकाः छात्राः साहसिनः कर्त्तव्यनिष्ठाश्च भवेयुः। | 2×1=2<br><br><br><br><br>2×2=4 |

| | | |
|---|---|---|
| | (ii) साहसिनः विद्यार्थिनः सदैव कर्मयोगिनः भूत्वा सम्यक्पदम् अलङ्कुर्वन्ति।<br>(iii) श्रमस्य साहसस्य च योग्यः फलितांशः प्राप्यते।<br>इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।<br>**श्रमसाहसयोः महत्त्वम् अथवा अन्यत् किमपि उचितं शीर्षकम्।**<br>छात्रस्य उत्तरं दृष्ट्वा छात्रहिताय समुचितं मूल्याङ्कनं करणीयम्।<br>ई. यथानिर्देशम् उत्तरत -<br>(i) (ख) जनाः<br>(ii) (घ) अनुसरन्ति<br>(iii) (ग) साहसिनः | 1<br><br>3×1=3 |
| | **भागः 'ख'**<br>**रचनात्मकं कार्यम्** | |
| 2. | **भवान् सुरेशः! संस्कृतसम्भाषणशिविरविषये स्वमित्रं प्रति लिखितं परं मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा पत्रं पुनः लिखत।**<br>रोहिणी सेक्टर 9,<br>**(i) दिल्लीतः**<br>तिथिः ___________<br><br>प्रिय मित्र राकेश !<br><br>सस्नेहं **(ii) नमस्ते**<br>अत्र सर्वगतं कुशलम्। मन्ये भवान् अपि **<u>(iii) कुशली</u>** स्यात्। गतसप्ताहे अस्माकं विद्यालये संस्कृतसम्भाषणशिबिरम् **(iv) आयोजितम्** आसीत्। दश दिनानि यावत् वयं संस्कृतेन सम्भाषणस्य **(v) अभ्यासं** कृतवन्तः। एकस्याः लघुनाटिकायाः मञ्चनं **(vi) वयम्** अकुर्म। अहं तु विदूषकस्य **(vii) अभिनयं** कृतवान्। सर्वे जनाः हसित्वा वारं वारं करतलध्वनिम् अकुर्वन्। अहं तु इदानीं सर्वदा संस्कृतेन एव वदामि। मम शिक्षकः अपि **(viii) मयि** स्निह्यति। त्वम् अपि प्रयत्नं कुरु। नूनं यशस्वी भविष्यसि। पितरौ **(ix) प्रति** मम प्रणामाञ्जलिं निवेदयतु।<br>तव **(x) अभिन्नहृदयः ,**<br>सुरेशः | 10×½=5 |
| | | |
| 3. अ | चित्रवर्णनम्<br>अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। **अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति।** वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति। प्रतिवाक्यम् अर्धः अङ्कः भावस्य कृते अर्धः अङ्कः च व्याकरणदृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति | 5×1=5 |

| | | |
|---|---|---|
| | अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते।<br>**अथवा** | |
| आ | **अनुच्छेदलेखनम्**<br>अयं विकल्पः सर्वेभ्यः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति। अतः अङ्काः देयाः। अस्य मूल्याङ्कनाय अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीयाः। | |
| | | |
| 4. अ | **संवादपूर्तिः**<br>एकदा कोऽपि अहङ्कारी विद्वान् नागरिकः नौकया नदीपारं गच्छति स्म। सः आकाशं पश्यति, नाविकं च पृच्छति –<br>**नागरिकः** - भो नाविक! नक्षत्रविद्यां जानासि किम् ?<br>**नाविकः** - **(i) अहं न जानामि महोदय! परम् अहं प्रतिदिनं तारकाणि दृष्ट्वा नमामि।**<br>**नागरिकः** - (हसन्) भो मूर्ख! तव जीवनस्य चतुर्थांशः नष्टः। त्वं गणितं पठितवान् किम्?<br>**नाविकः** - **(ii) महोदय! अहं केवलं गणनाम् एव जानामि, न तु सम्पूर्णं गणितम्।**<br>**नागरिकः** - एवं वा? तर्हि तव जीवनस्य अर्धं व्यर्थं जातम्। (वृक्षपङ्क्तीः दृष्ट्वा) किं त्वं वृक्षविज्ञानं जानासि ?<br>**नाविकः** - **(iii) अहं कथं वृक्षविज्ञानं जानीयाम्? अहं तु नौकां चालयित्वा स्वोदरं पूरयामि।**<br>**नागरिकः** - हा हन्त! तव जीवनस्य त्रिचतुर्थांशः भागः व्यर्थं गतः ।<br>**नाविकः** – **(iv) पश्यतु पश्यतु, प्रबलः वायुप्रकोपः उत्पन्नः। अहं तु जले कूर्दित्वा तरामि।**<br>**नागरिकः** - भोः! एषा नौका तु दोलायते। अत्र जलमपि प्रविशति। किं करोमि? अहं तु तरणं न जानामि।<br>**नाविकः** - **(v) तरणं न जानाति भवान् ? तर्हि नूनं भवतः तु सम्पूर्णमेव जीवनमेव नष्टम्।**<br>**अथवा** | 5×1=5 |
| आ | **कथापूर्तिः**<br>एकदा केचन शिष्याः (i) **भिक्षाटनं** कुर्वन्ति स्म। तदैव एकः गजः महता वेगेन तस्मिन् (ii) **मार्गे** आगच्छत्। गजस्य उपरि उपविष्टः (iii) **हस्तिपकः** उच्चस्वरेण पुनः पुनः घोषयति स्म - अपसरन्तु, अपसरन्तु इति। सर्वे (iv) **शिष्याः** धावितवन्तः। यथा सर्वेषु वस्तुषु (v) **ईश्वरः** अस्ति तथा गजे अपि अस्ति इति विचिन्त्य एकः शिष्यः तत्रैव (vi) **स्थितवान्**। तावति काले गजः तं स्वशुण्डेन गृहीत्वा दूरे क्षिप्तवान्। शिष्याः मूर्च्छितं तं गुरुकुलम् अनयन्। (vii) **लब्धसंज्ञं** तं गुरुः अपृच्छत् - "वत्स! त्वम् एवं किमर्थम् अकरोः इति।" शिष्यः (viii) **अवदत्** - "गुरुवर्य! भवद्भिः एव शिक्षितम् यत् ईश्वरः सर्वेषु अस्ति, अतः अहं गजे अपि (ix) **ईश्वरं** मत्वा तत्र अतिष्ठम् | 10×½=5 |

| | | |
|---|---|---|
| | इति।" गुरुः उक्तवान् - "वत्स! यथा गजे तथैव हस्तिपके अपि ईश्वरः इति त्वया **(x) कथं** न चिन्तितम् इति।" | |
| | | |
| | **भागः 'ग'**<br>**अनुप्रयुक्तव्याकरणम्** | |
| 5. अ | **सन्धिः सन्धिच्छेदश्च**<br>(i) सञ्चयात्<br>(ii) सुगन्धिश्च<br>(iii) लोके + अस्मिन्<br>(iv) पर्जन्यः + तत्<br><br>**अथवा** | 4×1=4 |
| आ | **सन्धिः सन्धिच्छेदश्च**<br>(i) च + एव<br>(ii) अग्निरिव<br>(iii) सः + विवेकः<br>(iv) काकादन्यः | |
| | | |
| 6. | **समस्तपदं विग्रहः च**<br>(i) (ग) उचितम् अनतिक्रम्य<br>(ii) (क) चक्षुषः दानम्<br>(iii) (ख) अनासक्ता<br>(iv) (घ) व्यासनारदौ | 4×1=4 |
| | | |
| 7. | **प्रत्ययाः**<br>(i) (ख) प्रधान + टाप्<br>(ii) (घ) चक्षुष्मन्तः<br>(iii) (क) दानशीलताम्<br>(iv) (ग) दृश् + अनीयर् | 4×1=4 |
| | | |
| 8. अ | **वाच्यम्**<br><br>**राकेशः** - प्रातः काले **(i) भवान्** किं करोति?<br>**राघवः** – प्रातःकाले मया पाठः स्मर्यते।<br>**राकेशः** - किं भवान् भ्रमणाय न गच्छति? | 3×1=3 |

| | | |
|---|---|---|
| | **राघवः** – अहम् अस्वस्थः अस्मि, अतः **(ii) मया** भ्रमणाय न गम्यते।<br>**राकेशः** - किं भवान् नित्यं व्यायामम् अपि करोति ?<br>**राघवः** - आम् ! मया नित्यं व्यायामः **(iii) क्रियते** ।<br>**अथवा**<br>(i) अहं तुभ्यं गदां शक्तिं च **ददामि**।<br>(ii) **अहं** शीतले जले तिष्ठामि।<br>(iii) अहम् **आचार्यं** पृच्छामि। | |
| आ | | |
| | | |
| 9. | **समयः**<br>(i) सार्ध-द्वादशवादने<br>(ii) पादोन-नववादनपर्यन्तम्<br>(iii) सपाद-पञ्चवादने | 3×1=3 |
| | | |
| 10. | **अव्ययपदानि**<br>(i) यत्<br>(ii) इव<br>(iii) इति<br>(iv) च | 4×1=4 |
| | | |
| 11. | **अशुद्धिसंशोधनम्**<br>(i) (क) दुर्निग्रहम्<br>(ii) (घ) यच्छति<br>(iii) (ग) वाञ्छसि | 3×1=3 |
| | **भागः 'घ'**<br>**पठितावबोधनम्** | |
| 12. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>**I. एकपदेन उत्तरत -** **(केवलं प्रश्नद्वयम्)**<br>(i) प्रच्छन्नभाग्यः<br>(ii) स्वगृहम्<br>(iii) उद्दण्डः<br>**II. पूर्णवाक्येन उत्तरत -** **(केवलं प्रश्नद्वयम्)**<br>(i) समुपजातविवेकः प्रच्छन्नभाग्यः स्वगृहं प्रतिनिवृत्तः।<br>(ii) अथ व्रजन्तौ तौ मार्गे क्रीडतः बालकान् दृष्ट्वा अवदताम् - यदि कश्चित् गर्ते | 5<br>2×½=1<br><br><br><br>2×1=2 |

| | | |
|---|---|---|
| | पतेत् तर्हि स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्।<br>(iii) प्रतिहतान्तःकरणः प्रच्छन्नभाग्यः अचिन्तयत् - 'किम् इदं वचनं विशेषेण माम् एव लक्ष्यीकरोति? अहो! कुमार्गम् आश्रितस्य मम कीदृशी इयं क्लेशपरम्परा। गुरूपदेशेन इव अनेन बालचचसा मम चक्षुषी समुन्मीलिते।<br>III. (अ) निर्देशानुसारम् उत्तरत -<br>(i) त्यज्यामि<br>(ii) दुष्टबुद्धिः<br>अथवा<br>(आ) निर्देशानुसारम् उत्तरत -<br>(i) सद्वचनानि<br>(ii) बालकः | 2×1=2 |
| | | |
| 13. | पद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -<br>I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) कामक्रोधोद्भवम्<br>(ii) शरीरविमोक्षणात्<br>(iii) विद्वांसः<br>II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) यः शरीरविमोक्षणात् प्राक् कामक्रोधोद्भवं वेगम् सोढुं शक्नोति सः सुखी नरः भवति।<br>(ii) अन्येषां वदने ये तु ते चक्षुर्नामनी मते।<br>(iii) विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।<br>III. (अ) निर्देशानुसारम् उत्तरत -<br>(i) शक्नोति<br>(ii) विद्वांसः<br>अथवा<br>(आ) निर्देशानुसारम् उत्तरत -<br>(i) सुखी<br>(ii) वदने | 5<br>2×½=1<br><br>2×1=2<br><br>2×1=2 |
| | | |
| 14. | अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -<br>I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) सूर्यस्य<br>(ii) मञ्चे<br>(iii) अरुणाचलप्रदेशम्<br>II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) | 5<br>2×½=1<br><br>2×1=2 |

| | | |
|---|---|---|
| | (i) पर्यटनाधिकारी प्रसीदति यतः छात्राः अस्य अरुणाचलप्रदेशस्य विषये ज्ञातुम् अति उत्सुकाः सन्ति।<br>(ii) पर्यटनाधिकारी प्रश्नोत्तरमाध्यमेन छात्राणां जिज्ञासां शमयितुम् इच्छति।<br>(iii) हिमांशु उत्तरति यत् अहं चिन्तयामि यत् 'अरुणः' तु सूर्यस्य पर्यायः। अस्य प्रकाशः सर्वप्रथमम् इमं प्रदेशं स्पृशति। अतः अरुणस्य प्रदेशः अरुणाचलः।<br>III. (अ) निर्देशानुसारम् उत्तरत -<br>(i) प्रकाशः<br>(ii) जिज्ञासाम्<br>अथवा<br>(आ) निर्देशानुसारम् उत्तरत -<br>(i) प्रदेशस्य<br>(ii) पृच्छामि | 2×1=2 |
| 15. | प्रश्ननिर्माणं कुरुत -<br>(i) **कीदृशी** वाणी पुरुषं प्रह्लादयति?<br>(ii) हंसः **कदा / कस्मिन्** तु मानसं पलायसे?<br>(iii) ज्वलन् मेषः **कुत्र / कां** प्रविशति?<br>(iv) कामस्य नाशाय **कानि** वशे करणीयानि?<br>(v) राजा **कान्** आहूय अश्वरक्षार्थम् अपृच्छत्? | 5×1=5 |
| 16. अ<br><br><br><br>आ | अन्वयपूर्तिः<br>अन्वयः - यदि काकस्य **(i) गात्रं** काञ्चनस्य, यदि चञ्चुदेशे **(ii) माणिक्यरत्नम्**, एकैकपक्षे मणीनाम् **(iii) ग्रथितं** तथापि (सः) काकः (एव) न तु **(iv) राजहंसः** ।<br>अथवा<br>भावार्थपूर्तिः<br>भावार्थः - **(i) कोमलतया** वर्णोच्चारणम्, **(ii) अक्षराणां** स्पष्टतया उच्चारणं, पदानां पृथक्तया **(iii) उच्चारणम्**, धैर्यम्, स्वरलयादिप्रदर्शने (आत्मविश्वासः) एते षट् श्रेष्ठानां **(iv) पाठकानां** गुणाः सन्ति। | 4×½=2 |
| 17. | प्रसङ्गानुकूलम् उचितार्थचयनम्<br>(i) (ग) सर्वं ददाति इति<br>(ii) (घ) पाकशालाम्<br>(iii) (ख) गच्छसि<br>(iv) (क) उद्विग्नता | 4×1=4 |

| | | |
|---|---|---|
| 18. | पठितकथा-पूर्तिः - <br>पूर्वं बोधिसत्त्व: (i)**शिवीनां** राजा अभवत्। स: बाल्यकालात् एव दानशील: वृद्धोपसेवी च आसीत्। स: नगरस्य समन्तत: दानशाला: अकारयत्। तत्र देशान्तरेभ्य: अपि **(ii) जना:** आगत्य दानं प्राप्य सन्तुष्टाः अभवन्। याचकानां सङ्ख्या च क्रमश: **(iii) न्यूनतां** गता। एतत् दृष्ट्वा राजा चिन्तित: अभवत्। स: शरीरस्य **(iv) अङ्गानि** अपि दातुम् उद्यत: अभवत्। एतत् ज्ञात्वा **(v) देवाधिपति:** शक्र: तस्य परीक्षणं कर्तुं **(vi) नेत्रहीनयाचकस्य** रूपं धृत्वा तस्य सम्मुखे आगच्छत्। स: च राजा स्वस्य नेत्रम् एकैकश: नेत्रद्वयमपि तस्य कृते अयच्छत्। इन्द्र: प्रीत: भूत्वा तस्मै (vii) **नेत्रद्वयम्** अयच्छत्। येन स: **(viii) पर्वतानां** पारम् अपि द्रष्टुं समर्थ: स्यात्। तथा कृत्वा शक्र: अन्तर्हित: अभवत्। | 8×½=4 |

-------------0000--------------